# 2021

## SANSKRIT — HONOURS

**Paper : DSE-4**

**(Veda)**

**Full Marks : 65**

*The figures in the margin indicate full marks.*

*Candidates are required to give their answers in their own words as far as practicable.*

विशेषोल्लेखं बिना सर्वेषां प्रश्नानामुत्तरं **संस्कृतभाषया देवनागरलिप्या** च प्रदातव्यम्।

**Section - A**

**Unit : I**

**(Marks : 10)**

1. अधोदत्तेषु प्रश्न***पञ्चकं*** समाधेयम्। 2×5

(a) सायणाचार्येण कस्य वेदस्य भाष्यं प्रथमं विरचितम्? तेन विरचितस्य ऋग्भाष्यस्य नाम लिख्यताम्।

(b) कस्यैव वेदस्य भाष्यं कृतं दयानन्दसरस्वतिमहोदयेन्? तस्य भाष्यस्य नाम समुल्लिख्यताम्।

(c) तैत्तिरीयसंहितायाः प्राचीनतमो भाष्यकृत् कः? किमासीत् तदीयभाष्यस्य नाम?

(d) ऋषिणा अरविन्देन विरचितस्य ग्रन्थद्वयस्य नाम लेख्यम्।

(e) सायणपूर्वभाविनि काले वेदभाष्यकारिणां मध्ये कस्यापि आचार्यद्वयस्य नाम प्रदातव्यम्।

(f) गौरीधर्मपालविरचितस्य वैदिकग्रन्थद्वयस्य नाम लेखनीयम्।

(g) निरुक्तस्य कस्यापि भाष्यकारस्य नाम उल्लिख्यताम्। केन भारतीयेन सर्वप्रथमं निरुक्तग्रन्थस्य सम्पादनं कृतम्?

**Unit : II**

**(Marks : 25)**

2. अधोदत्तयोः यथेच्छम् ***एकः*** प्रश्नः समाधेयः।

(a) क आसीद् हरिश्चन्द्रः? स कस्य मतानुसारं कं देवम् आराध्य पुत्रं लेभे? क आसीत् तस्य पुत्रः? हरिश्चन्द्रः कथं केन रोगेण आक्रान्तोऽभवत्? 1+2+1+1+7

(b) शुनःशेपाख्यानस्य नामान्तरं किम्? अजीगर्तस्य कति पुत्रा आसन्, के च ते? तेषु कः तेन रोहिताय हरिश्चन्द्रस्य यज्ञार्थं प्रदत्तः? उपख्यानानुसारं तस्य यज्ञस्य वृत्तं विव्रियताम्। 1+1+2+1+7

**3.** अधोलिखितेषु ***एकः*** व्याख्येयः। 8

(a) चरन् वै मधु विन्दति चरन् स्वादुमुदुम्बरम्।
सूर्यस्य पश्य श्रेमाणं यो न तन्द्रयते चरंश्चरैवेति॥

(b) तमेतमभिषेचनीये पुरुषं पशुमालभे।

(c) शश्वत् पुत्रेण पितरोऽत्यायन् बहुलं तमः।
आत्मा हि जज्ञ आत्मनः स इरावत्यतितारिणी॥

**4.** निम्नोद्धृतयोः ***एकतरः आङ्गलभाषया वङ्गभाषया वा*** अनुद्यताम्। 5

(a) तस्य ह दन्ता पेदिरे; तं होवाचापत्सत वा अस्य दन्ताः; यजस्व माऽनेनेति; स होवाच; यदा वै पशोर्दन्ताः पुनर्जायन्तेऽथ स मेध्यो भवति; दन्ता न्वस्य पुनर्जायन्तामथ त्वा यजा इति।

(b) आस्ते भग आसीनस्योर्ध्वस्तिष्ठति तिष्ठतः।
शेते निपद्यमानस्य चराति चरतो भगश्चरैवेति॥

## Section - B
## Unit : I
## (Marks : 25)

**5.** अधःप्रदत्तयोः ***एकतरस्य*** उत्तरं लेखनीयम्।

(a) तैत्तिरीयोपनिषद् कस्मिन् वेदे आम्नाता? तस्याः आद्यायाः वल्ल्याः नाम किम्? का नाम शीक्षा? शीक्षास्वरूपं पाठ्यानुसारम् उपवर्ण्यताम्। 1+1+3+7

(b) का तावत् महासंहिता? तस्याः स्वरूपम् उपासनाफलं च व्याख्येयम्। 3+6+3

**6.** यथेच्छम् ***एकतमः*** व्याख्येयः। 8

(a) एतास्तिस्र व्याहृतयः।

(b) ओमिति ब्रह्म। ओमितीदं सर्वम्।

(c) यान्यनवद्यानि कर्माणि। तानि सेवितव्यानि। ना इतराणि।

**7.** अधोलिखितयोः ***एकतरस्य वङ्गभाषया आङ्गलभाषया वा*** अनुवादः कार्यः। 5

(a) अथाध्यात्मम् - प्राणो व्यानोऽपान उदानः समानः। चक्षुः, श्रोत्रं मनो वाक् त्वक्। चर्म मांसं स्नावास्थि मज्ज्ञा एतद्धि विधाय ऋषिरवोचत्। पाङ्क्तं वा इदं सर्वं पाङ्क्तेनैव पाङ्क्तं स्पृणोतीति।

(b) शं नो मित्रः शं वरुणः
शं नो भवत्वर्यमा।
शं न इन्द्रो बृहस्पतिः
शं नो विष्णुरुरुक्रमः।

### Unit : II

### (Marks : 5)

**8.** ***एकतरः आङ्ग्लभाषया वङ्गभाषया वा*** अनुद्यताम्। 5

(a) अविद्यायामन्तरे वर्तमानाः स्वयं धीराः पण्डितं मन्यमानाः।
जङ्घन्यमानाः परियन्ति मूढा अन्धेनैव नीयमाना यथान्धाः॥

(b) परीक्ष्य लोकान् कर्मचितान् ब्राह्मणो
निर्वेदमायान्नास्त्यकृतः कृतेन।
तद्विज्ञानार्थं स गुरुमेवाभिगच्छेत्
समित्पाणिः श्रोत्रियं ब्रह्मनिष्ठम्॥